.. shrIgaNapatisahasranAmastotram ..

॥ श्रीगणपतिसहस्रनामस्तोत्रम् ॥

॥ श्रीरस्तु ॥

गणेश्वरो गणक्रीडो गणनाथो गणाधिपः ।
एकदंष्ट्रो वक्रतुण्डो गजवक्त्रो महोदरः ॥ १॥

लम्बोदरो धूम्रवर्णो विकटो विघ्ननायकः ।
सुमुखो दुर्मुखो बुद्धो विघ्नराजो गजाननः ॥ २॥

भीमः प्रमोद आनन्दो सुरानन्दो मदोत्कटः ।
हेरम्बश्शम्बरश्शम्भुर्लम्बकर्णो महाबलः ॥ ३॥

नन्दनोऽलम्पटो भीमो मेघनादो गणञ्जयः ।
विनायको विरूपाक्षो धीरश्शूरो वरप्रदः ॥ ४॥

महागणपतिर्बुद्धिप्रियः क्षिप्रप्रसादनः ।
रुद्रप्रियो गणाध्यक्षो उमापुत्रोऽघनाशनः ॥ ५॥

कुमारगुरुरीशानपुत्रो मूषकवाहनः ।
सिद्धिप्रदः सिद्धिपतिस्सिद्धिस्सिद्धिविनायकः ॥ ६॥

विघ्नस्तुङ्गभुजस्सिम्हवाहनो मोहिनीप्रियः ।
कटिङ्कटो राजपुत्रश्शकलस्सम्मितोऽमितः ॥ ७॥

कूश्माण्डगणसम्भूतो दुर्जयो धूर्जयोऽजयः ।
भूपतिर्भुवनेशश्च भूतानां पतिरव्ययः ॥ ८॥

विश्वकर्ता विश्वमुखो विश्वरूपो निधिर्घृणिः ।
कविः कवीनामृषभो ब्रह्मण्यो ब्रह्मणस्पतिः ॥ ९॥

ज्येष्ठराजो निधिपतिः निधिप्रियपतिप्रियः ।
हिरण्मयपुरान्तस्थः सूर्यमण्डलमध्यगः ॥ १०॥

कराहतिध्वस्तसिन्धुसलिलः पूषदन्तभृत् ।
उमाङ्गकेळिकुतुकी मुक्तिदः कुलपालकः ॥ ११॥

किरीटी कुण्डली हारी वनमाली मनोमयः ।
वैमुख्यहतदृश्यश्रीः पादाहत्या जितक्षितिः ॥ १२॥

सद्यो जातः स्वर्णभुजः मेखली दुर्निमित्तहृत् ।
दुस्स्वप्नहृत्प्रहसनो गुणी नादप्रतिष्ठितः ॥ १३॥

सुरूपस्सर्वनेत्राधिवासो वीरासनाश्रयः ।
पीताम्बरः खड्गधरो खण्डेन्दुकृतशेखरः ॥ १४॥

चित्राङ्गश्श्यामदशनो फालचन्द्रश्चतुर्भुजः ।
योगाधिपस्तारकस्थः पुरुषो गजकर्णकः ॥ १५॥

गणाधिराजो विजयस्थिरो गणपतिर्ध्वजी ।
देवदेवः स्मरप्राणदीपको वायुकीलकः ॥ १६॥

विपश्चिद्वरदो नादो नादभिन्नवलाहकः ।
वराहवदनो मृत्युञ्जयो व्याघ्राजिनाम्बरः ॥ १७॥

इच्छाशक्तिधरो देवत्राता दैत्यविमर्दनः ।
शम्भुवक्त्रोद्भवश्शम्भुकोपहा शम्भुहास्यभूः ॥ १८॥

शम्भुतेजाश्शिवाशोकहारी गौरीसुखावहः ।
उमाङ्गमलजो गौरीतेजोभूस्स्वर्धुनीभवः ॥ १९॥

यज्ञकायो महानादो गिरिवर्षशुभाननः ।
सर्वात्मा सर्वदेवात्मा ब्रह्ममूर्धा ककुप्छ्रुतिः ॥ २०॥

ब्रह्माण्डकुम्भश्चिद्व्योमफालस्सत्यशिरोरुहः ।
जगज्जन्मलयोन्मेषनिमेषोऽग्न्यर्कसोमदृक् ॥ २१॥

गिरीद्रैकरदो धर्मो धर्मिष्ठः सामबृंहितः ।
ग्रहर्क्षदशनो वाणीजिह्वो वासवनासिकः ॥ २२॥

कुलाचलांसस्सोमार्कघण्टो रुद्रशिरोधरः ।
नदीनदभुजस्सर्पाङ्गुळिकस्तारकानखः ॥ २३॥

भ्रूमध्यसंस्थितकरोब्रह्मविद्यामदोत्कटः ।
व्योमनाभः श्रीहृदयो मेरुपृष्ठोऽर्णवोदरः ॥ २४॥

कुक्षिस्थयक्षगन्धर्वरक्षःकिन्नरमानुषः ।
पृथ्वीकटिस्सृष्टिलिङ्गः शैलोरूदग्रजानुकः ॥ २५॥

पाताळजङ्घो मुनिपत्कालाङ्गुष्ठस्त्रयीतनुः ।
ज्योतिर्मण्डललाङ्गूलो हृदयालाननिश्चलः ॥ २६॥

हृत्पद्मकर्णिकाशायी वियत्केळिसरोरुहः ।

सङ्गक्तध्याननिगळो पूजावारि निवारितः ॥ २७ ॥

प्रतापी काश्यपसुतः गणपो विटपी बली ।
यशस्वी धार्मिकस्स्वोजाः प्रमथः प्रमथेश्वरः ॥ २८ ॥

चिन्तामणिद्वीपपतिः कल्पद्रुमवनालयः ।
रत्नमण्डपमध्यस्थो रत्नसिंहासनाश्रयः ॥ २९ ॥

तीव्राशिरोधृतपदो ज्वालिनीमौळिलालितः ।
नन्दानन्दितपीठश्रीः भोगदाभूषितासनः ॥ ३० ॥

सकामदायिनीपीठः स्फुरदुग्रासनाश्रयः ।
तेजोवतीशिरोरत्नस्सत्यानित्यवतंसितः ॥ ३१ ॥

सविघ्ननाशिनीपीठस्सर्वशक्त्यम्बुजालयः ।
लिपिपद्मासनाधारो वह्निधामत्रयालयः ॥ ३२ ॥

उन्नतप्रपदो गूढगुल्फस्संवृतपार्ष्णिकः ।
पीनजङ्घः श्लिष्टजानुः स्थूलरूपो नमत्कटिः ॥ ३३ ॥

निम्ननाभिः स्थूलकुक्षिः पीनवक्षा बृहद्भुजः ।
पीनस्कन्धो कम्बुकण्ठो लम्बोष्ठो लम्बनासिकः ॥ ३४ ॥

भग्नवामरदस्तुङ्गदक्षदंतो महाहनुः ।
ह्रस्वनेत्रत्रयश्शूर्पकर्णो निबिडमस्तकः ॥ ३५ ॥

स्तम्बकाकारकुम्भाग्रो रत्नमौळिर्निरङ्कुशः ।
सर्पहारकटीसूत्रस्सर्पयज्ञोपवीतवान् ॥ ३६ ॥

सर्पकोटीरकटकः सर्पग्रैवेयकाङ्गदः ।
सर्पकक्षोदराबन्धः सर्पराजोत्तरीयकः ॥ ३७ ॥

रक्तरक्तांबरधरो रक्तमाल्यविभूषणः ।
रक्तेक्षणो रक्तकरो रक्ततात्वोष्ठपल्लवः ॥ ३८ ॥

श्वेतश्वेताम्बरधरः श्वेतमाल्यविभूषणः ।
श्वेतातपत्ररुचिरश्श्वेतचामरवीजितः ॥ ३९ ॥

सर्वावयवसंपूर्णस्सर्वलक्षणलक्षितः ।
सर्वाभरणभूषाढ्यस्सर्वशोभासमन्वितः ॥ ४० ॥

सर्वमङ्गळमाङ्गल्यस्सर्वकारणकारणः ।
सर्वदैककरश्शार्ङ्गीबीजापूरगदाधरः ॥ ४१ ॥

इक्षुचापधरश्शूली चक्रपाणिस्सरोजभृत् ।
पाशी धृतोत्पलश्शालीमञ्जरीभृत् स्वदन्तभृत् ॥ ४२ ॥

कल्पवल्लीधरो विश्वाभयदैककरो वशी ।
अक्षमालाधरो ज्ञानमुद्रावान्मुद्गरायुधः ॥ ४३ ॥

पूर्णपात्री कम्बुधरो विधूतारिसमूहकः ।
मातुलुङ्गधरश्शूतकलिकाभृत्कुठारवान् ॥ ४४ ॥

पुष्करस्थस्वर्णघटीपूर्णरत्नाभिवर्षकः ।
भारतीसुन्दरीनाथो विनायकरतिप्रियः ॥ ४५ ॥

महालक्ष्मीप्रियतमः सिद्धलक्ष्मीमनोहरः ।
रमारमेशपूर्वाङ्गो दक्षिणोमामहेश्वरः ॥ ४६ ॥

महीवराहवामाङ्गो रतिकन्दर्पपश्चिमः ।
आमोद मोदजननस्सप्रमोदप्रमोदनः ॥ ४७ ॥

समेधितसमृद्धश्रीः बुद्धिसिद्धिप्रवर्तकः ।
दत्तसौमुख्यसुमुखः कान्तिकन्दळिताश्रयः ॥ ४८ ॥

मदनावत्याश्रिताङ्घ्रिः कृतवैमुख्यदुर्मुखः ।
विघ्नसम्पल्लतोपघ्नः सदोन्निद्रमदद्रवः ॥ ४९ ॥

विघ्नकृन्निघ्नचरणो द्राविणीशक्तिसत्कृतः ।
तीव्राप्रसन्ननयनो ज्वालिनीपालनैकदृक् ॥ ५० ॥

मोहिनीमोहनो भोगदायिनीकान्तिमण्डितः ।
कामिनीकान्तवक्त्रश्रीरधिष्ठितवसुन्धरः ॥ ५१ ॥

वसुधारा मनोमोद महाशङ्खनिधिप्रभुः ।
नमद्वसुमतीमौळिमहापद्मनिधिप्रभुः ॥ ५२ ॥

सर्वसद्गुरुसंसेव्यश्शोचिष्केशहृदाश्रयः ।
ईशानमूर्धा देवेन्द्रशिखः पवननन्दनः ॥ ५३ ॥

उग्रः प्रत्यग्रनयनो दिव्यास्त्राणां प्रयोगवान् ।
ऐरावतादिसर्वाशावारणावरणप्रियः ॥ ५४ ॥

वज्राद्यस्त्रपरीवारो गणचण्डसमाश्रयः ।
जयो जयपरीवारो विजयो विजयावहः ॥ ५५ ॥

अजितार्चितपादाब्जः नित्यानित्यवतंसितः ।
विलासिनीकृतोल्लासश्शौण्डी सौन्दर्यमण्डितः ॥ ५६ ॥

अनन्तानन्तसुखदस्सुमङ्गळसुमङ्गळः ।
इच्छाशक्तिर्ज्ञानशक्तिक्रियाशक्तिनिषेवितः ॥ ५७ ॥

सुभगासंश्रितपदः ललितालालिताश्रयः ।
कामिनीकामनः कामः मानिनीकेळिलालितः ॥ ५८ ॥

सरस्वत्याश्रयो गौरीनन्दनः श्रीनिकेतनः ।
गुरुगुप्तपदो वाचा सिद्धो वागीश्वरेश्वरः ॥ ५९ ॥

नळिनीकामुको वामारामाज्येष्ठामनोरमः ।
रौद्रीमुद्रितपादाब्जः हुम्बीजस्तुङ्गशक्तिकः ॥ ६० ॥

विश्वादिजननत्राणः स्वाहाशक्तिस्सकीलकः ।
अमृताब्धिकृतावासः मदघूर्णितलोचनः ॥ ६१ ॥

उच्छिष्टगण उच्छिष्टगणेशो गणनायकः ।
सार्वकालिकसंसिद्धिः नित्यशैवदिगम्बरः ॥ ६२ ॥

अनपायोऽनन्तदृष्टिरप्रमेयोऽजरामरः ।
अनाविलोऽप्रतिरथो अच्युतोह्यमृताक्षरः ॥ ६३ ॥

अप्रतर्क्योऽक्षयोऽजय्यो अनाथश्च अनामयः ।
अमोघसिद्धिरद्वैतो अघोरोऽप्रतिमाननः ॥ ६४ ॥

अनाकारोऽब्धिभूम्यग्निबलहाऽव्यक्तलक्षणः ।
आधारपीठ आधार आधाराधेयवर्जितः ॥ ६५ ॥

आखुवाहन केत्वाशापूरकाखुमहारणः ।
इक्षुसागरमध्यस्थः इक्षुभक्षणलालसः ॥ ६६ ॥

इक्षुचापातिरेकश्रीः इक्षुचापनिषेवितः ।
इन्द्रगोपसमानश्रीः इन्द्रनीलसमद्युतिः ॥ ६७ ॥

इन्दीवरदळश्यामः इन्दुमण्डलनिर्मलः ।
इन्द्रप्रिय इडाभाग इडाधामेन्दिराप्रियः ॥ ६८ ॥

इक्ष्वाकुविघ्नविध्वंसी इतिकर्तव्यतेप्सितः ।
ईशानमौळिरीशान ईशानसुत ईशधः ॥ ६९ ॥

ईषणात्रयकल्पान्तः ईहामात्रविवर्जितः ।
उपेन्द्र उडुभृन्मौळिरुडेरकबलिप्रियः ॥ ७० ॥

उन्नतानन उत्तुङ्ग उदारस्त्रिदशाग्रणीः ।
ऊर्जस्वानूर्ज्वलतनुः ऊहापोहदुरासदः ॥ ७१ ॥

ऋग्यजुस्सामसम्भूतिऋद्धिसिद्धिप्रवर्तकः ।
ऋजुचित्तैकसुलभः ऋणत्रयविमोचनः ॥ ७२ ॥

स्वभक्तविघ्ननाशश्च सुरद्विट्छक्तिलोपकृत् ।
विमुखार्चनाविलुप्तश्रीर्लूताविस्फोटनाशनः ॥ ७३ ॥

एकारपीठमध्यस्थ एकपादकृतासनः ।
एजिताखिलदैत्यश्रीः एजिताखिलसंश्रयः ॥ ७४ ॥

ऐश्वर्यनिधिरैश्वर्यऐहिकामुष्मिकप्रदः ।
ऐरंमदसमोन्मेष ऐरावतनिभाननः ॥ ७५ ॥

ओङ्कारवाच्य ओङ्कार ओजस्वानोषधीपतिः ।
औदार्यनिधिरौद्धत्यधुर्य औन्नत्यविग्रहः ॥ ७६ ॥

सुरनागानामङ्कुशश्च सुरविद्विषामङ्कुशः ।
असमस्तविसर्गांतपादेषु परिकीर्तितः ॥ ७७ ॥

कमण्डलुधरः कल्पः कपर्दी कलभाननः ।
कर्मसाक्षी कर्मकर्ता कर्माकर्मफलप्रदः ॥ ७८ ॥

कदम्बकोरकाकारः कूश्माण्डगणनायकः ।
कारुण्यदेहकपिलः कथकः कटिसूत्रभृत् ॥ ७९ ॥

खर्वः खड्गप्रियः खड्गी खातान्तस्थः खनिर्मलः ।
खर्वाटश्रृङ्गनिलयः खट्वाङ्गी खदुरासदः ॥ ८० ॥

गणाढ्यो गहनो गम्यो गद्यपद्यसुधार्णवः ।
गद्यगानप्रियो गर्जः गीतगीर्वाणपूर्वजः ॥ ८१ ॥

गुह्याचाररतो गुह्यः गुह्यागमनिरूपितः ।
गुहाशयो गुहाब्धिस्थो गुरुगम्यो गुरोर्गुरुः ॥ ८२ ॥

घण्टाघर्घरिकामाली घण्टकुम्भो घटोदरः ।
चण्डश्चण्डीश्वरश्चण्डी चण्डेशश्चण्डविक्रमः ॥ ८३ ॥

चराचरपिता चिन्तामणिचर्वणलालसः ।
छन्दश्छन्दोवपुश्छन्दो दुर्लक्ष्यश्छन्दविग्रहः ॥ ८४ ॥

जगद्योनिर्जगत्साक्षी जगदीशो जगन्मयः ।
जपो जपपरो जप्यो जिह्वासिंहासनप्रभुः ॥ ८५ ॥

झलज्झल्लोलसद्दानझङ्कारिभ्रमराकुलः ।
टङ्कारस्फारसंरावानुकारिमणिनूपुरः ॥ ८६ ॥

तापत्रयनिवारी च सर्वमन्त्रैकसिद्धिदः ।
डिण्डिमुण्डो डाकिनीशो डामरो डिण्डिमप्रियः ॥ ८७ ॥

ढक्कानिनादमुदितो ढौको ढुण्ढिविनायकः ।
तत्वानां परमस्तत्वज्ञेयस्तत्वनिरूपितः ॥ ८८ ॥

तारकान्तरसंस्थानस्तारकस्तारकान्तकः ।
स्थाणुः स्थाणुप्रियः स्थाता स्थावरो जङ्गमो जगत् ॥ ८९ ॥

दक्षयज्ञप्रमथनो दाता दानवमोहनः ।
दयावान्दिव्यविभवो दण्डभृद्दण्डनायकः ॥ ९० ॥

दन्तप्रभिन्नाभ्रमलो दैत्यवारणदारणः ।
दंष्ट्रालग्नद्विपघटो देवार्थनृगजाकृतिः ॥ ९१ ॥

धनधान्यपतिर्धन्यो धनदो धरणीधरः ।
ध्यानैकप्रकटो ध्येयः ध्यानो ध्यानपरायणः ॥ ९२ ॥

नन्द्यो नन्दिप्रियो नादो नादमध्यप्रतिष्ठितः ।
निष्कळो निर्मलो नित्यो नित्यानित्यो निरामयः ॥ ९३ ॥

परंव्योमा परन्धामा परमात्मा परम्पदः ।
परात्परः पशुपतिः पूर्णमोदकसारवान् ॥ ९४ ॥

पूर्णानन्दः परानन्दः पुराणपुरुषोत्तमः ।
पद्मप्रसन्ननयनः प्रणताज्ञानमोचनः ॥ ९५ ॥

प्रमाणप्रत्ययातीतः प्रणतार्तिनिवारणः ।
फलहस्तः फणिपतिः फेत्कारफणितप्रियः ॥ ९६ ॥

बाणार्चिताङ्घ्रियुगळो बाणकेळिकुतूहली ।
ब्रह्मा ब्रह्मार्चितपदो ब्रह्मचारी बृहस्पतिः ॥ ९७ ॥

बृहत्तमो ब्रह्मपरो ब्रह्मण्यो ब्रह्मवित्प्रियः ।
बृहन्नादाग्र्यचीत्कारो ब्रह्माण्डावळिमेखलः ॥ ९८ ॥

भ्रूक्षेपदत्तलक्ष्मीको भर्गो भद्रो भयापहः ।
भगवान् भक्तिसुलभो भूतिदो भूतिभूषणः ॥ ९९ ॥

भव्यो भूतालयो भोगदाता भ्रूमध्यगोचरः ।
मन्त्रो मन्त्रपतिर्मन्त्री मदमत्तमनोरमः ॥ १०० ॥

मेखलावान्मन्दगतिः मतिमत्कमलेक्षणः ।
महाबलो महावीरो महाप्राणमहामनाः ॥ १०१ ॥

यज्ञो यज्ञपतिर्यज्ञगोप्ता यज्ञफलप्रदः ।
यशस्करो योगगम्यो याज्ञिको याजकप्रियः ॥ १०२ ॥

रसो रसप्रियो रस्यो रञ्जको रावणार्चितः ।
रक्षोरक्षाकरो रत्नगर्भो राज्यसुखप्रदः ॥ १०३ ॥

लक्षो लक्षप्रदो लक्ष्यो लयस्थो लड्डुकप्रियः ।
लास्यप्रियो लास्यप्रदो लाभकृल्लोकविश्रुतः ॥ १०४ ॥

वरेण्यो वह्निवदनो वन्द्यो वेदान्तगोचरः ।
विकर्ता विश्वतश्चक्षुः विधाता विश्वतोमुखः ॥ १०५ ॥

वामदेवो विश्वनेता वज्री वज्रनिवारणः ।
विश्वबन्धन विष्कम्भधारो विश्वामरप्रभुः ॥ १०६ ॥

शब्दब्रह्मशमप्राप्यो शम्भुशक्तिगणेश्वरः ।
शास्त्रशिखाग्रनिलयो शरण्यः शिखरीश्वरः ॥ १०७ ॥

षड्तुकुसुमस्रग्वी षडाधारः षडक्षरः ।
संसारवैद्यस्सर्वज्ञः सर्वभेषजभेषजः ॥ १०८ ॥

सृष्टिस्थितिलयक्रीडस्सुरकुञ्जरभेदनः ।
सिन्दूरितमहाकुम्भस्सदसद्व्यक्तिदायकः ॥ १०९ ॥

साक्षी समुद्रमथनः स्वसंवेद्यः स्वदक्षिणः ।
स्वतन्त्रस्सत्यसङ्कल्पस्सामगानरतस्सुखी ॥ ११० ॥

हंसो हस्तिपिशाचीशो हवनो हव्यकव्यभुक् ।
हव्यो हृतप्रियो हर्षो हृल्लेखामन्त्रमध्यगः ॥ १११ ॥

क्षेत्राधिपः क्षमाभर्ता क्षमापरपरायणः ।
क्षिप्रक्षेमकरः क्षेमानन्दः क्षोणीसुरद्रुमः ॥ ११२ ॥

धर्मप्रदोऽर्थदः कामदाता सौभाग्यवर्धनः ।
विद्याप्रदो विभवदो भुक्तिमुक्तिफलप्रदः ॥ ११३ ॥

आभिरूप्यकरो वीरश्रीप्रदो विजयप्रदः ।
सर्ववश्यकरो गर्भदोषहा पुत्रपौत्रदः ॥ ११४ ॥

मेधादः कीर्तिदश्शोकहारी दौर्भाग्यनाशनः ।
प्रतिवादिमुखस्तम्भो दुष्टचित्तप्रसादनः ॥ ११५ ॥

पराभिचारशमनो दुःखभञ्जनकारकः ।
लवस्त्रुटिः कला काष्ठा निमेषो घटिमुहूर्तकः ॥ ११६ ॥

प्रहरश्च दिवा नक्तः अहोरात्र अहर्निशम् ।
पक्षो मासायनो वर्षाः युगः कल्पो महालयः ॥ ११७ ॥

राशिस्तारातिथिर्योगः वारः करण अंशकः ।
लग्नो होरा कालचक्रो मेरुस्सप्तर्षयो ध्रुवः ॥ ११८ ॥

राहुर्मन्दः कविर्जीवः बुधो भौमश्शशी रविः ।

कालः सृष्टिस्थितिर्विश्वः स्थावरो जङ्गमो जगत् ॥ ११९ ॥

भूरापोग्निर्मरुद्व्योमा अहंकृत्प्रकृतिः पुमान् ।
ब्रह्मा विष्णुश्शिवो रुद्रईशशक्तिस्सदाशिवः ॥ १२० ॥

त्रिदशाः पितरस्सिद्धा यक्षा रक्षाश्च किन्नराः ।
साध्या विद्याधरा भूताः मनुष्याः पशवः खगाः ॥ १२१ ॥

समुद्रास्सरितश्शैलाः भूतो भव्यो भवोद्भवः ।
साङ्ख्यः पातञ्जलो योगः पुराणश्च श्रुतिः स्मृतिः ॥ १२२ ॥

वेदाङ्गाश्च सदाचारः मीमांसा न्यायविस्तरः ।
आयुर्वेदो धनुर्वेदो गान्धर्वः काव्यनाटकः ॥ १२३ ॥

वैखानसो भागवतो मानुषः पाञ्चरात्रकः ।
शैवः पाशुपतः कालमुखो भैरवशासनः ॥ १२४ ॥

शाक्तो वैनायकस्सौरो जैनघूर्हतसंहितः ।
सदसद्व्यक्त अव्यक्तस्सचेतनऽचेतनः ॥ १२५ ॥

बन्धो मोक्षस्सुखो भोगो योगस्सत्य अणुर्महत् ।
स्वस्ति हुंरूपषड्रूपखड्गभ्रूश्च स्वधामयः ॥ १२६ ॥

स्वाहारूपः श्रौषड्रूपो वौषड्रूपो वषण्मयः ।
ज्ञानविज्ञान आनन्दो बोधस्संविच्छमो यमः ॥ १२७ ॥

एको एकाक्षरो एक एकाक्षरपरायणः ।
एकाग्रधीरेकवीरो एकानेकस्वरूपधृत् ॥ १२८ ॥

द्विरूपो द्विभुजो द्व्यक्षो द्विरदो द्विपरक्षकः ।
द्वैमातुरद्विवदनो द्वन्द्वातीतो द्वयातिगः ॥ १२९ ॥

त्रिधामा श्रीकरस्त्रेता त्रिवर्गफलदायकः ।
त्रिगुणात्मा त्रिलोकादिस्त्रिशक्तीशस्त्रिलोचनः ॥ १३० ॥

चतुर्बाहुश्चतुर्दन्तश्चतुरात्मा चतुर्मुखः ।
चतुर्विधोपायकरश्चतुर्विधफलप्रदः ॥ १३१ ॥

चतुराननसंप्रीतः चतुर्वर्णाश्रमाश्रयः ।
चतुर्विधवचोवृत्तिपरिवृत्तिप्रवर्तकः ॥ १३२ ॥

चतुर्थीपूजनप्रीतश्चतुर्थीतिथिसम्भवः ।
पञ्चाक्षरात्मा पञ्चात्मा पञ्चास्यः पञ्चकृत्यकृत् ॥ १३३ ॥

पञ्चाधारः पञ्चवर्णः पञ्चाक्षरपरायणः ।
पञ्चताळः पञ्चकरः पञ्चप्रणवभाविकः ॥ १३४ ॥

पञ्चब्रह्ममयस्फूर्तिः पञ्चावरणवारितः ।
पञ्चभक्ष्यप्रियः पञ्चबाणः पञ्चशिवात्मकः ॥ १३५ ॥

षट्कोणपीठषट्चक्रधामा षट्ग्रन्थिभेदकः ।
षडध्वध्वान्तविध्वंसी षडङ्गुलमहाह्रदः ॥ १३६ ॥

षण्मुखः षण्मुखभ्राता षट्छक्तिपरिवारितः ।
षड्वैरिवर्गविध्वंसी षड्भिमयभञ्जनः ॥ १३७ ॥

षट्तर्कदूरषष्ठकर्मनिरतः षड्साश्रयः ।
सप्तपाताळचरणः सप्तद्वीपोरुमण्डितः ॥ १३८ ॥

सप्तस्वर्लोकमकुटस्सप्तसप्तिवरप्रदः ।
सप्ताङ्गराज्यसुखदस्सप्तर्षिगणमण्डितः ॥ १३९ ॥

सप्तछन्दोनिधिस्सप्तहोता सप्तस्वराश्रयः ।
सप्ताब्धिकेळिकासारस्सप्तमातृनिषेवितः ॥ १४० ॥

सप्तच्छदामोदमदस्सप्तछन्दोमुखप्रियः ।
अष्टमूर्तिर्ध्येयमूर्तिरष्टप्रकृतिकारणः ॥ १४१ ॥

अष्टाङ्गयोगफलभुगष्टपत्राम्बुजासनः ।
अष्टशक्तिसमृद्धश्रीरष्टैश्वर्यप्रदायकः ॥ १४२ ॥

अष्टपीठोपपीठश्रीरष्टमातृसमावृतः ।
अष्टभैरवसेव्योऽष्टवसुवन्द्योऽष्टमूर्तिभृत् ॥ १४३ ॥

अष्टचक्रस्फुरन्मूर्तिरष्टद्रव्यहविः प्रियः ।
नवनागासनाध्यासी नवनिध्यनुशासिता ॥ १४४ ॥

नवद्वारघनाधारो नवधारनिकेतनः ।
नरनारायणस्तुत्यो नवदुर्गानिषेवितः ॥ १४५ ॥

नवनाथमहानाथो नवनागविभूषणः ।
नवरत्नविचित्राङ्गो नवशक्तिशिरोधृतः ॥ १४६ ॥

दशात्मको दशभुजो दशदिक्पतिवन्दितः ।
दशाध्यायो दशप्राणो दशेन्द्रियनियामकः ॥ १४७ ॥

दशाक्षरमहामन्त्रो दशाशाव्यापिविग्रहः ।
एकादशादिरुद्रैस्संस्तुत एकादशाक्षरः ॥ १४८ ॥

द्वादशोद्दण्डदोर्दण्डो द्वादशाङ्कनिकेतनः ।
त्रयोदशभिधाभिन्नविश्वेदेवाधिदैवतः ॥ १४९ ॥

चतुर्दशेन्द्रप्रभवश्चतुर्दशमनुप्रभुः ।
चतुर्दशादिविद्याढ्यश्चतुर्दशजगत्प्रभुः ॥ १५० ॥

सामपञ्चदशः पञ्चदशीशीतांशुनिर्मलः ।
षोडशाधारनिलयः षोडशस्वरमातृकः ॥ १५१ ॥

षोडशान्तपदावासः षोडशेन्दुकलात्मकः ।
सप्तसप्तदशी सप्तदशस्सप्तदशाक्षरः ॥ १५२ ॥

अष्टादशद्वीपपतिरष्टादशपुराणकृत् ।
अष्टादशौषधिस्रष्टा अष्टादशमुनिस्मृतः ॥ १५३ ॥

अष्टादशलिपिव्यष्टिसमष्टिज्ञानकोविदः ।
एकविंशः पुमानेकविंशत्यङ्गुळिपल्लवः ॥ १५४ ॥

चतुर्विंशतितत्वात्मा पञ्चविंशाख्यपूरुषः ।
सप्तविंशतितारेशस्सप्तविंशतियोगकृत् ॥ १५५ ॥

द्वात्रिंशद्भैरवाधीशश्चतुस्त्रिंशन्महाह्रदः ।
षट्त्रिंशत्तत्वसम्भूतिरष्टत्रिंशत्कलातनुः ॥ १५६ ॥

नमदेकोनपञ्चाशन्मरुद्वर्गनिरर्गळः ।
पञ्चाशदक्षरश्रेणिः पञ्चाशद्रुद्रविग्रहः ॥ १५७ ॥

पञ्चाशद्विष्णुशक्तीशः पञ्चाशन्मातृकालयः ।
द्विपञ्चाशद्वपुश्श्रेणिस्त्रिषष्ट्यक्षरसंश्रयः ॥ १५८ ॥

चतुष्षष्ट्यर्णनिर्णेता चतुष्षष्टिकलानिधिः ।
चतुष्षष्टिमहासिद्धयोगिनीबृन्दवन्दितः ॥ १५९ ॥

अष्टषष्टिमहातीर्थक्षेत्रभैरवभावनः ।
चतुर्णवतिमन्त्रात्मा षण्णवत्यधिकप्रभुः ॥ १६० ॥

शतानन्दश्शतमखश्शतपत्रायतेक्षणः ।
शतानीकश्शतधृतश्शतधारवरायुधः ॥ १६१ ॥

सहस्रपत्रनिलयस्सहस्रफणिभूषणः ।
सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ॥ १६२ ॥

सहस्रनामसंस्तुत्यस्सहस्राक्षबलापहः ।
फणामण्डलसाहस्रफणिराजकृतासनः ॥ १६३ ॥

दशसाहस्रफणभृत्फणिराजकृतासनः ।
अष्टाशीतिसहस्रौघमहर्षिस्तोत्रयन्त्रितः ॥ १६४ ॥

महाकायो महात्मापि चण्डिलश्चेष्टदो रसः ।
आधारोऽसौ वेदमयो हेरम्ब स्स्कन्दपूर्वजः ॥ १६५ ॥

लक्षाधीशप्रियाधारो लक्षाधारमनोमयः ।
चतुर्लक्षजपप्रीतश्चतुर्लक्षप्रकाशितः ॥ १६६ ॥

चतुरशीतिलक्षाणां जीवानां देहसंस्थितः ।
कोटिसूर्यप्रतीकाशः कोटिचन्द्रांशुनिर्मलः ॥ १६७ ॥

कोटियज्ञप्रमथनः कोटियज्ञफलप्रदः ।
शिवाभवाद्यष्टकोटिविनायकधुरन्धरः ॥ १६८ ॥

सप्तकोटिमहामन्त्रमन्त्रितावयवद्युतिः ।
त्रयस्त्रिंशत्कोटिसुरश्रेणीप्रणतपादुकः ॥ १६९ ॥

अनन्तदेवतासेव्यः अनन्तशुभदायकः ।
अनन्तनामानन्तश्रीरनन्तानन्तसौख्यदः ॥ १७० ॥

॥ इति श्रीमहागणपतिसहस्रनामस्तोत्रं समाप्तम् ॥

Encoded by
M. Suresh (msuresh@altavista.net)

Please send corrections to sanskrit@cheerful.com
Last updated January 20, 1999